दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् कार्तिककृष्णदशमी
आश्विन ३१ प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-351 | 1 | अक्तूबर, 16 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 कर्मचारिभ्यः दीपावल्याः उपहारः- मुख्यमंत्री सुक्खुः त्रिप्रतिशतमहार्घतावृत्तिः दातुं घोषितवान्

3 काङ्ग्रेसदलं राजनैतिकलाभार्थं स्वर्गीयवीरभद्रसिंहस्य स्मृत्या अक्रीडत्, इतिहासः तान् कदापि न क्षमिष्यति- शान्ताकुमारः

4 केन्द्रीयसंस्कृतविश्वविद्यालयस्य ५५ तमस्य स्थापनादिवसस्य साहित्योत्सवस्य च उद्घाटनम्

## सुभाषितम्

**नास्ति मेघसमं तोयं,
नास्ति चात्मसमं बलम्।
नास्ति चक्षुः समं तेजो,
नास्ति धान्यसमं प्रियम्।**

भावार्थः- बादलों के समान कोई दूसरा जल का साधन नहीं है, आत्मबल के समान कोई बल नहीं है। अपने नेत्रों के समान कोई तेज नहीं है और अन्न के समान स्वजीविका के लिए कोई प्रिय नहीं है।

## महाराष्ट्रे एकषष्ठिं यावत् वरिष्ठाः नक्सलवादिनः, मुख्यमन्त्रिणः देवेन्द्र फड्नविस्-वर्यस्य उपस्थितौ आत्मसमर्पणं कृतवन्तः

हिमसंस्कृतवार्ताः - महाराष्ट्रे एकषष्ठिं यावत् वरिष्ठाः नक्सलवादिनः, मुख्यमन्त्रिणः देवेन्द्र फड्नविस्-वर्यस्य उपस्थितौ, गड्चिरोली-आरक्षकाणां समक्षम् आत्मसमर्पणं कृतवन्तः। केन्द्रिय नक्सल्-समित्याः पालिट्-ब्यूरो सदस्यः मल्लुजोला-वेणुगोपाल-रावः अथवा भूपतिः, गडचिरोली-नगरे आयोजिते कार्यक्रमे अन्यैः षष्ठिः वरिष्ठैः नक्सलसदस्यैः सह आत्मसमर्पणं कृतवान्। एते सर्वे एकषष्ठि-नक्सलवादिनः षट्कोटिरूप्यकाणां सामूहिकं पारितोषिकं वहन्ति स्म। समूहे विभागीय-समिति-सदस्याः, क्षेत्र-समितिः, दल-सदस्याः इत्यादयः उच्चपदासिनाः सदस्याः सन्ति। नक्सलवादिनः स्वशस्त्रं त्यक्तवन्तः, तथा च मुख्यमन्त्री देवेन्द्र फडणवीसः एतेषां शरणागततानां नक्सलवादिनां मुख्यधारायाम् स्वागतस्य प्रतीकरूपेण भारतीयसंविधानस्य प्रतिलिपिं प्रदत्तवान्। अस्मिन् अवसरे, श्रीदेवेन्द्रः अवदत् यत्, इदं महाराष्ट्रस्य नक्सल्-आन्दोलनस्य इतिहासे अद्यावधि पर्यन्तं वृहत्तमं सामूहिक आत्मसमर्पणम् अस्ति।

## सर्वोच्चन्यायालयेन आगामि-दीपावलि-उत्सवस्यावधौ राष्ट्रिय-राजधानी-क्षेत्रे हरित-विस्फोटकानां विक्रयणस्य विस्फोटनस्य च अनुमतिः प्रदत्ता



हिमसंस्कृतवार्ताः - सर्वोच्चन्यायालयेन आगामि-दीपावलि-उत्सवस्यावधौ दिल्ली-नगरे तथा राष्ट्रिय-राजधानी-क्षेत्रे हरित-विस्फोटकानां विक्रयणस्य विस्फोटनस्य च अनुमतिः प्रदत्ता, अत्र तावत् उत्सवस्य आचरणे पर्यावरणस्य संरक्षणे च सन्तुलितः दृष्टिकोणः इति वर्णितः। भारतस्य मुख्यन्यायाधीशः वी. आर्. गवई तथा न्यायमूर्तिः विनोद् चन्द्रन् इत्येतयोः पीठेन संयुक्तादेशे उक्तं यत् अक्टूबर-मासस्य अष्टादश दिनाङ्कात् अक्टूबर-मासस्य विंशतिदिनाङ्कपर्यन्तं हरित-विस्फोटकानां विक्रयणस्य अनुमतिः प्रदीयते। सर्वोच्चन्यायालयेन इतोऽपि निर्देशः प्रदत्तः यत् दीपावल्याः पूर्वदिने अपि च दीपावल्याः दिने च दिनद्वये प्रातः षडवादनात् प्रातः सप्तवादनपर्यन्तं, सायम् अष्टवादनात् दशवादनपर्यन्तं च एतादृशानां हरित-विस्फोटकानां प्रज्वलनस्य अनुमतिः प्रदत्ता।

## केन्द्रीय रेलमन्त्री अश्विनी वैष्णवः नवदेहल्यां भारतमण्डपे एशियायाः बृहत्तमायाः अन्ताराष्ट्रिय-रेलवे-उपकरण-प्रदर्शिन्याः उद्घाटनम् अकरोत्



हिमसंस्कृतवार्ताः - केन्द्रीय-रेलमन्त्री अश्विनी वैष्णवः नवदेहल्यां भारतमण्डपे एशियायाः बृहत्तमां तथा विश्वस्य द्वितीय-बृहत्तमां रेलवे प्रदर्शिनीम् उद्घाटितवान् । इयं वस्तुतः पञ्चविंशत्यधिक-द्विसहस्रतम-वर्षस्य षोडश अन्ताराष्ट्रिय-रेलोपकरण-प्रदर्शनी वर्तते । अवधेयास्पदमिदं यत् पञ्चदशेभ्यः अपि अधिकेभ्यः देशेभ्यः पञ्चाशदधिक-चतुश्शतम् प्रदर्शकाः अत्याधुनिक-रेल-मेट्रो-उत्पादनानां, नवाचाराणां सहैव स्थायी समाधानानां च प्रदर्शनं कुर्वन्ति । अत्रावसरे भाषमाणः श्री-वैष्णवः अवदत् यत् गतेषु एकादशवर्षेषु प्रधानमन्त्री नरेन्द्रमोदी रेलवे-तन्त्रस्य आधुनिकीकरणे अवधानं दत्तवान् । सः अवदत् यत्, रेलविभागः द्रुतगत्या आधुनिकीकरणाय प्रतिवर्षं षट्पञ्चाशदधिक-द्विलक्षकोटि-रुप्यकाणां निवेशं कुर्वन् अस्ति।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest h|msanskr|tvartah Da|ly Sanskr|t Newspaper every day, wr|te Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## ब्राजील-देशस्य उपराष्ट्रपतिः गेराल्डो-अल्कमिनः भारतस्य त्रिदिवसीय-यात्रायै नवदेहलीं प्राप्तवान्

हिमसंस्कृतवार्ताः - ब्राजील-देशस्य उपराष्ट्रपतिः गेराल्डो-अल्कमिनः भारतस्य त्रिदिवसीय-यात्रायै नवदिल्लीं प्राप्तवान् । सः अद्य वाणिज्योद्योग-मन्त्रिणा पीयूष गोयलेन सह व्यापार-मन्त्रिस्तरीय-समीक्षोपवेशनं करिष्यति । त्रिदिवसीय यात्रावधौ श्रीअल्कमिनः उपराष्ट्रपतिना सी.पी.-राधाकृष्णन इत्यनेन रक्षामन्त्रिणा राजनाथसिंहेन ,विदेशमन्त्रिणा डॉ. एस. जयशङ्करेण तथैव पेट्रोलियम-प्राकृतिक-वातेन्धन-मन्त्रिणा हरदीप-पुरी-इत्यमुना च सह मिलिष्यति । अत्रावधौ ते परस्पर हितमालक्ष्य चर्चा करिष्यन्ति । अवधेयमस्ति यत् ब्राजील-देशः दक्षिण-अमेरिकायां भारतस्य बृहत्तमः व्यापार-सहभागी वर्तते ।

## बिहार-विधानसभानिर्वाचनार्थं जेडीयू पक्षेण ५७ प्रत्याशिनां स्वीया प्रथमा सूची अपरत्र भाजपेति दलेन द्वादश-प्रत्याशिनां स्वीया द्वितीयसूची प्रकाशिता



हिमसंस्कृतवार्ताः - बिहार-विधानसभानिर्वाचनार्थं गतिविधयः तावत् सजवं प्रवर्तन्ते। भारतीयजनता-पार्टीति दलानन्तरं जनतादल-यूनाइटेड-पक्षेणापि सप्तपञ्चाशत् प्रत्याशिनां स्वीया प्रथमा सूची निस्सारिता । दलेन बहुभ्यः विधायकेभ्यः राज्यमन्त्रिभ्यश्च पुनः निर्वाचनद्वन्द्वे भागग्रहणाय अवसरः प्रदत्तः । बिहार विधानसभायाः उपाध्यक्षः वरिष्ठनेता च नरेन्द्र-नारायण-यादवः मधेपुरा-मण्डलस्य आलमनगर-निर्वाचनक्षेत्रात् निर्वाचने योत्स्यते ।तत्रैव अलीपुरतः प्रसिद्धा लोकगायिका मैथिलीठाकुरः चर्चायामस्ति। अन्यः महेश्वर-हजारी इत्येषः समस्तीपुर-जनपदस्य कल्याणपुर-निर्वाचनक्षेत्रात् निर्वाचनं करिष्यति। पूर्व-सांसदः अश्वमेध-देवी इत्यस्यै समस्तीपुर-विधानसभा क्षेत्रात् निर्वाचनपत्रं प्रदत्तम्। पूर्वमन्त्री श्याम-रजकः फुलवारी-शरीफ-निर्वाचनक्षेत्रात् तथा सन्तोष-निराला राजनगरतः निर्वाचनद्वन्द्वे स्पर्धिष्यतः। पलिया नगरे वार्ताहरैः सह सम्भाषमाणः बिहार-भाजपा-प्रमुखः दिलीप-जायसवालः अवदत् यत् सर्वेषां दलानां मध्ये आसन-विभाजनस्य निर्वाचनक्षेत्राणां च विषये चर्चा समभवत्। सः अवदत् यत्, एतासां चर्चाणां अनन्तरम् प्रत्येकः पक्षः इदानीं स्व-स्व प्रत्याशिनां नामानि घोषयति। बिहारस्य उप-मुख्यमन्त्री विजय सिन्हा इत्येषः लखनीसरल-विधानसभा-क्षेत्रात् स्वस्य नामाङ्कनं प्रदत्तवान् तत्रैव, महागठबन्धनस्य घटक दलस्य आरजेडी-पक्षस्य नेता मृत्युञ्जय तिवारी अवदत् यत् महागठबन्धनम् सङ्गठितमस्ति तथा दृढ़तया निर्वाचनद्वन्द्वे योत्स्यते ।

# कर्मचारिभ्यः दीपावल्याः उपहारः- मुख्यमंत्री सुक्खुः त्रिप्रतिशतमहार्घतावृत्तिः दातुं घोषितवान्



**हिमसंस्कृतवार्ताः- शिमला।** सुक्खुसर्वकारेण हिमाचलप्रदेश- सर्वकारीय- कर्मचारिभ्यः दीपावल्याः उपहारः दत्तः। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः बुधवासरे राज्यविद्युत्मण्डलस्य कर्मचारीसंघस्य राज्यसम्मेलने त्रिप्रतिशतमहार्घतावृत्तिः दातुं घोषणां कृतवान्। मुख्यमंत्रिणा बजटे एतत् घोषितम् आसीत्, परन्तु दुर्बलवित्तीयस्थित्याः कारणात् जूनमासे भुक्तिः कर्तुं न शक्यते स्म। २०२५ तमस्य वर्षस्य अप्रैलमासस्य प्रथमदिनात् सितम्बर-मासपर्यन्तं अवशिष्टांशधनं दीपावलीतः पूर्वं कर्मचारिणां वित्तकोषसंख्यासु निक्षिप्तं भविष्यति। नवम्बरमासे कर्मचारिभ्यः देयस्य अक्तूबरमासस्य वेतनेन वृत्तिना च सह महार्घतावृत्तिः योजिता भविष्यति।

अपि च जुलाई २०२३ तः मार्च २०२५ पर्यन्तं महार्घतावृत्तेः अवशिष्टांशस्य भुक्तिविषये शीघ्रमेव पृथक्कतया निर्णयः स्वीकृत्य अधिसूचना निर्गता भविष्यति तदतिरिक्तं बाह्याधारेण नियुक्तकर्मचारिणः दुर्घटनायाः सन्दर्भे सर्वकाराद् क्षतिपूर्तिं प्राप्नुयुः। तत्काल प्रभावेण पदोन्नतिः क्रियते। विद्युत्मण्डले ओपीएस इत्यादीन् निर्णयान् कथम् अधिकं कार्यान्वितुं शक्यते इति निर्णयः क्रियते। कर्मचारिणां विरुद्धं प्रवेशितानि आरोपपत्राणि निवृत्तानि भविष्यन्ति।राज्यविद्युत्मण्डलकर्मचारिसङ्घस्य राज्यमहासम्मेलनं बुधवासरे शिमलानगरे आयोजितम्। राज्यस्य अतिथिगृहे पीटर हॉफ इत्यत्र आयोजितस्य सम्मेलनस्य समापनसमारोहे मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः मुख्यातिथिरूपेण भागं गृहीतवान्। सः संघस्य स्मारिकाम् अपि विमोचितवान्। संघस्य महासचिवः हीरालालवर्मा इत्यनेन उक्तं यत् १९७१ तमे वर्षे संघस्य निर्माणम् अभवत्।

## त्रिलोकठाकुरः मुख्यमंत्रिणः धन्यवादं ज्ञापितवान्

**शिमला** - हिमाचलप्रदेश- अराजपत्रित-कर्मचारीसेवा- महासंघस्य प्रदेशाध्यक्षः त्रिलोकठाकुरः मुख्यमंत्रिणः सुखविंदरसिंहसुक्खोः धन्यवादः ज्ञापितवान्। सः अवदत् यत् मुख्यमन्त्री कर्मचारिणां प्रति संवेदनशीलता उत्तरदायित्वं च प्रशंसनीयम् अस्ति। अक्तूबरमासस्य वेतने त्रिप्रतिशतं महार्घतावृत्तिः समाविष्टाः, दिवालीतः पूर्वं अवशिष्टांशस्य मुक्तिः च तस्य कर्मचारी-केन्द्रितपद्धतेः उदाहरणानि सन्ति त्रिलोकठाकुरः अवदत् यत् मुख्यमन्त्री प्रत्येकस्य कर्मचारीविषयस्य शीघ्रं समाधानं सुनिश्चितं कुर्वन् अस्ति। संघेन शीघ्रमेव सूचनां निर्गन्तुम् अपि अनुरोधः कृतः, येन कर्मचारिणः समये सम्बलं, तेषाम् अवशिष्टांशं च प्राप्तुं शक्नुवन्ति। अस्मिन्नवसरे महामंत्री राजीवचौहानः, वरिष्ठ-उपाध्यक्षः रविन्द्र मेहता, महासचिवः मनीष गुलेरिया, कुल्लोः अराजपत्रित-कर्मचारीमहासंघस्य अध्यक्षः संजयभारद्वाजः, मंडीजनपदस्य अशिक्षण- कर्मचारीमहासंघस्य अध्यक्षः राजेशरावः, महासचिवः महेशकुमारः, हितेन्द्रठाकुरः, मुकेशकुमारः अन्ये च महासंघस्य वरिष्ठपदाधिकारिणः उपस्थिताः अभवन्। हिमाचलप्रदेश- अराजपत्रितकर्मचारी-सेवा महासङ्घः मुख्यमन्त्रिणः कर्मचारीमैत्रीपूर्णस्य दृष्टिकोणस्य प्रशंसाम् अकरोत्, तत् कर्मचारिणां कृते प्रेरणादायकम् उत्साहवर्धकं च पदम् इति उक्तवान्।

# "मुख्यमंत्री सुक्खुः ४८ होरासु वीरभद्रसिंहस्य शिक्षां विस्मृतवान्"- जयरामठाकुरः

## "एचआरटीसी-प्रबन्धनम् उचितहस्ते नास्ति



**हिमसंस्कृतवार्ताः- मण्डी।** हिमाचलप्रदेशस्य पूर्वमुख्यमन्त्री विपक्षनेता च जयरामठाकुरः २८ विद्यालयानां अवनयनार्थं राज्यसर्वकारे तीव्रप्रहारं कृतवान्। सः अवदत् यत् केवलं ४८ होरापूर्वं मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः स्वर्गीयस्य वीरभद्रसिंहस्य प्रतिमायाः अनावरणसमारोहे उक्तवान् यत् वीरभद्रसिंहेन एकस्य अपि बालकस्य कृते विद्यालयः उद्घाटितः, परन्तु अधुना तस्य स्वकीयः सर्वकारः विद्यालयान् पिहितं करोति।

जयरामठाकुरः आरोपं कृतवान् यत् एषः निर्णयः शिक्षाव्यवस्थायाः उपरि प्रत्यक्षम् आक्रमणम् अस्ति। छात्राणां संख्यायाः न्यूनतायाः विषये सर्वकारस्य चिन्ता भवेत्, न तु विद्यालयान् पिधातुं स्पर्धा।

## १०३८ दिवसेषु १४४८ विद्यालयाः पिहिताः-

सः विनोदं कृतवान् यत् सुक्खु-सर्वकारेण स्वस्य शासनस्य १०३८ दिवसेषु १४४८ विद्यालयाः पिहितं कृत्वा प्रतिदिनद्वये त्रयः विद्यालयाः पिहितं कृत्वा अभिलेखः स्थापितः। एषः केवलं शैक्षणिकसंस्थानां द्रोहः एव नास्ति, अपितु बालानाम् भविष्यस्य छेदनम् एव। एतासां नीतीनां कारणात् राज्ये केवलं वर्षत्रयेण ३० वर्षाणि पृष्ठे गतम् अस्ति।

## सर्वकारस्य कार्यं "मित्रकल्याणराज्यस्य" निर्माणं न भवति

जयरामठाकुरः अवदत् यत् लोकतान्त्रिकव्यवस्थायां सर्वकारस्य कार्यं "सामाजिककल्याणराज्यस्य" निर्माणं भवति, न तु "मित्रकल्याणराज्यस्य" निर्माणम्। सः आरोपितवान् यत् सर्वकारः प्रथमं विद्यालयात् शिक्षकान् निष्कासयति यत् अराजकतां जनयति, अभिभावकान् स्वसन्ततिनां नामाङ्कनं कर्तुं निरुत्साहयति च। ततः न्यूनछात्रसङ्ख्यां उद्धृत्य विद्यालयाः पिहिताः भवन्ति। सः एतत् अपराधिकं षड्यन्त्रम् इति आह्वयत्।

## किं एचआरटीसी-प्रबन्धनम् उचितहस्ते नास्ति?

एचआरटीसी-विषये जयराम-ठाकुरः मुख्यमन्त्रिणम् अपि लक्ष्यं कृत्वा पृष्टवान् यत्, "मुख्यमन्त्री-मतानुसारं एचआरटीसी-प्रबन्धनं सम्यक् हस्तेषु नास्ति वा? मुख्यमन्त्री- उपमुख्यमन्त्रिणोः च मध्ये समन्वयस्य अभावात् सर्वकारः अस्थिरः दृश्यते, तस्य परिणामः जनसमूहः भोगयति" इति

## १५,००० तः अधिकेभ्यः जनेभ्यः आजीविकाः अपहृताः

विपक्षनेता अवदत् यत् मृषावादस्य अभिलेखं धारयन्तं सर्वकारम् अधुना कार्यहानिषु अपि अग्रणी अस्ति। एतावता १५,००० तः अधिकाः जनाः स्वकार्यं त्यक्तवन्तः अर्थात् प्रतिदिनं १५ जनाः स्वकार्यं त्यक्तवन्तः। ततः पूर्वं जयरामठाकुरः सराजमण्डलस्य बागस्याड़े त्रयाणां मण्डलानां अधिकारिभिः सह गोष्ठीं कृतवान्।

# मुख्यमंत्री सुक्खुः

## राजीवगान्धी- स्वरोजगार-प्रारंभयोजनायाः (RGSSY) अन्तर्गतम् ई- टैक्सी-यानानि हरितध्वजं प्रदर्शितवान्

हिमसंस्कृतवार्ताः - शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः बुधवासरे स्वस्य आधिकारिकनिवासस्थानात् ओक ओवरतः राजीवगान्धी- स्वरोजगारप्रारम्भयोजनायाः अन्तर्गतं १८ ई-टैक्सीयानानि हरितध्वजं प्रदर्श्य प्रेषितवान्। शिमलामण्डलस्य चतुर्भ्यः युवभ्यः, कांगड़ा- किन्नौर- मण्डलयोः त्रिभ्यः, चम्बा-कुल्लू- सोलन- मण्डलानां च द्वाभ्यां, हमीरपुर-सिरमौर- मण्डलयोः एकैकस्य कृते ई-टैक्सी-यानानि प्रदत्तानि एतेषां टैक्सी-क्रयणार्थं राज्यसर्वकारेण ₹१.२८ कोटिरूप्यकाणाम् अनुदानं प्रदत्तम्। अस्याः योजनायाः अन्तर्गतं राज्यसर्वकारः ई- टैक्सी- क्रयणार्थं युवभ्यः ५० प्रतिशतम् अनुदानं प्रददाति, अधुना यावत् राज्ये ७९ पात्रयुवकानां कृते ₹५.६४ कोटिरूप्यकाणां वितरणं कृतम् अस्ति।

अस्मिन्नवसरे वदन् मुख्यमन्त्री अवदत् यत् एतेन




न केवलं युनां कृते लाभप्रदाः स्वरोजगारस्य अवसराः प्राप्यन्ते, अपि तु एतानि ई-टैक्सी-वाहनानि सर्वकारीयविभागैः निगमैः च सह सम्बद्ध्य पञ्चवर्षपर्यन्तम् आयं सुनिश्चितं भविष्यति, यत्र द्विवर्षीयविस्तारस्य प्रावधानं भवति। सः अपि अवदत् यत् एतेन राज्यस्य आर्थिकभारे महती न्यूनता भवति। वर्तमानवित्तवर्षे एतावता ई- टैक्सीक्रयणार्थं ४० पात्रयुवकानां कृते ₹२.७२ कोटिरूप्यकाणाम् अनुदानं सर्वकारेण प्रदत्तम् अस्ति। सः अवदत् यत् वर्तमानवित्तवर्षे राज्ये विद्युत्वाहनानां क्रयणार्थं सर्वकारेण ₹६६.४१ कोटिरूप्यकाणि विनियोजितानि सन्ति। राज्यसर्वकारः राज्यस्य पर्यावरणस्य रक्षणाय प्रतिबद्धः अस्ति, ई-वाहनानां प्रचारः हिमाचलप्रदेशं देशस्य हरित ऊर्जाराज्यं कर्तुं महत्त्वपूर्णं सोपानम् अस्ति।

## हिमाचलप्रदेशसर्वकारेण अपरं महत्त्वपूर्णं न्यायिकसफलता, अतिथिगृहाद् ₹401 कोटिरूप्यकाणि प्राप्तानि

हिमसंस्कृतवार्ताः। हिमाचलप्रदेशसर्वकारेण अपरं महत्त्वपूर्णं न्यायिकसफलता प्राप्ता, यत्र मशोबरा रिसोर्ट लिमिटेड् इत्यस्मै वाइल्ड फ्लावर हॉल अतिथिगृहाद् ₹401 कोटिरूप्यकाणि प्राप्तानि भविष्यन्ति। इदानीं राज्यं कम्पन्याः एकमात्रं स्वामी भविष्यति। राज्यस्य उच्चन्यायालयस्य आदेशानुसारं अधुना हिमाचलप्रदेशे संयुक्तोद्यमकम्पन्योः (जेवीसी) बैंकनिक्षेपाणां, शेयरधारकाणां, पूंजीविरुद्धस्य अग्रिमस्य च ५० प्रतिशतं भागः अस्ति उच्चन्यायालयस्य १४ अक्टोबर् २०२५ दिनाङ्के निर्णयानुसारं जेवी कम्पन्याः वित्तीयशेषः प्रायः ₹३२० कोटिरूप्यकाणां राज्ये स्थानान्तरितः भविष्यति तदतिरिक्तं न्यायालयेन मध्यस्थनिर्णयस्य अनुसारं राज्यं ₹25 कोटिरूप्यकाणि दातुं आदेशः दत्तः। जेवी कम्पन्यां ईस्ट् इण्डिया होटेल्स् (EIH) इत्यस्य सम्पूर्णं भागं ₹13 कोटिरूप्यकाणि राज्ये स्थानान्तरितम् भविष्यति। अपि च, केवलं ५० प्रतिशतं धनं अथवा ₹६८ कोटिरूप्यकाणि ई.आइ.एच्. एषा राशिः जेवी-कम्पन्यां ईआईएच-द्वारा निक्षिप्तस्य ₹१३६ कोटिरूप्यकाणां विनिमयरूपेण प्रत्यागमिष्यति । अनेन राज्याय ६८ कोटिरूप्यकाणां अतिरिक्तलाभः भविष्यति।

# काङ्ग्रेसदलं राजनैतिकलाभार्थं स्वर्गीयवीरभद्रसिंहस्य स्मृत्या अक्रीडत्, इतिहासः तान् कदापि न क्षमिष्यति- शान्ताकुमारः



**हिमसंस्कृतवार्ताः-** पालमपुरम्। हिमाचलप्रदेशस्य पूर्वमुख्यमन्त्री शान्ताकुमारः शिमलानगरस्य रिजप्राङ्गणे श्रीवीरभद्रसिंहस्य प्रतिमायाः अनावरणस्य राजनीतिकरणस्य आरोपं कृत्वा अतीव दुःखं प्रकटितवान्। शान्ताकुमारमहोदयः अवदत् यत् काङ्ग्रेसनेतृणां प्रतिमायाः अनावरणं राज्यस्य राजनैतिकपरम्पराणां कृते अनुचितं भवति। सः अवदत् "अस्याः घटनायाः कारणात् अहं अतीव दुःखितः अस्मि। अद्य मम हृदयं व्यथितम् अस्ति।" सः अवदत् यत् हिमाचलप्रदेशस्य विकासे वीरभद्रसिंहस्य योगदानस्य सदैव आदरं कृतवान्, परन्तु काङ्ग्रेसपक्षस्य आयोजनस्य राजनीतिकरणस्य निर्णयः खेदजनकः अस्ति। सः अवदत् यत् वीरभद्रसिंहः षड्वारं मुख्यमन्त्री निर्वाचितः, राज्यस्य विकासे तस्य भूमिकां न निराकर्तुं शक्यते। एवं प्रकारेण प्रतिमानावरणस्य आयोजनं कृत्वा काङ्ग्रेसपक्षः तस्य स्मृतेः राजनैतिकलाभं ग्रहीतुं प्रयतते इति सः आरोपितवान्। एतादृशे महत्त्वपूर्णे अवसरे सर्वपक्षाणां नेतारः आमन्त्रिताः स्युः चेत् श्रेयस्करं स्यात् इति सः अवदत्। स्वराजनैतिकयात्रायाः स्मरणं कुर्वन् शान्ताकुमारमहोदयः १९९० तमे वर्षे मुख्यमन्त्रीरूपेण विधानसभायाः निर्माणस्य आरम्भं कृतवान् इति घटनां स्मरणं कृतवान्। पश्चात् अयोध्यायाः मस्जिदस्य ध्वंसनस्य अनन्तरं सः राजनैतिक-अशान्तिं प्राप्नोत्। सः अवदत् यत् अस्माकं राजनैतिकभेदानाम् अभावेऽपि वीरभद्रसिंहस्य मम च परस्परं सम्मानम् आसीत्। सः स्मरणं कृतवान् यत् वीरभद्रसिंहः एकदा तस्मै अवदत् यत् "समयः परिवर्तते, परन्तु सिद्धान्ताः अवश्यमेव तिष्ठन्ति" इति। सः काङ्ग्रेसनेतृभ्यः आग्रहं कृतवान् यत् ते हिमाचलप्रदेशस्य जनेभ्यः क्षमायाचनां कुर्वन्तु यत् एतस्याः संवेदनशीलायाः घटनायाः राजनीतिकरणं कृतवन्तः। सः अवदत् यत् काङ्ग्रेसेन न केवलं भाजपायाः अपि तु सम्पूर्णराज्यस्य प्रति अन्यायः कृतः। इतिहासः एतादृशानि कर्माणि कदापि न क्षमिष्यति।

# भयानक-दुर्घटना :

## राजस्थानस्य जैसलमेरतः जोधपुरं प्रति गच्छन्ते बसयाने अग्निः प्रज्वलिता बसयाने ५७ जनाः आसन्



हिमसंस्कृतवार्ताः - राजस्थाने, जैसलमेर-समीपे एका दुःखद-मार्गदुर्घटना अभवत्। वायुनियन्त्रित-शयन-लोक-बसयाने अग्निना दह्यमाने सति, एक-विंशतिः जनाः मृताः अन्ये च अनेके तीव्रतया व्रणिताः सन्ति । अत्रान्तरे एकः दशवर्षीयः बालकः अपि मृत्युमुपगतः । जैसलमेर-जोधपुर-राजमार्गे सायं सार्धत्रिवादनस्य समीपे एषा घटना अभवत् । राष्ट्रपतिः द्रौपदी मुर्मुः सामाजिकमाध्यमेन स्वस्य दुःखं प्रकटितवती। सा शोकग्रस्तपरिवारेभ्यः गभीराः शोकसंवेदनाः प्रकटितवती, घातितानां शीघ्रं स्वस्थतायै च प्रार्थनां कृतवती । प्रधानमन्त्री नरेन्द्रमोदी दुःखदघटनायाम् अतीव दुःखं प्रकटितवान्, घातितानां शीघ्रं स्वस्थतायाः च कामनाम् अकरोत्।

# लोकभाषाप्रचारसमित्या आभासिक-संस्कृतसम्भाषण- वर्गोद्घाटनम्



**हिमसंस्कृतवार्ताः-** सुरवाणी संस्कृतभाषा अस्माकं जननीभाषा वर्तते। तस्याः विश्वव्यापकात्मकप्रसाराय लोकभाषाप्रचारसमितिद्वारा वैश्विकस्तरे बहुविधप्रकल्पैः सम्पाद्यते प्रचारकार्यम्। तेषु प्रकल्पेषु अन्यतमोऽस्ति प्रतिमासं जायमान आभासिकसंस्कृतसम्भाषणवर्गः। अस्मिन् मासस्य कृतेऽपि गते १४/१०/२५तमे दिनाङ्के वर्गः प्रारम्भो जातः। उद्घाटनसत्रं समित्याः आधारपुरुषस्य डॉ. सदानन्ददीक्षितवर्यस्य आशीषा, राष्ट्रियमहासचिवस्य श्रीविभूतिनारायणकरमहोदयस्य तत्त्वावधाने तथा ओडिशाशाखाध्यक्षस्य संस्कृतपण्डितस्य पं गोपालकृष्णपाढीवर्यस्य अध्यक्षतायां समितेः बौद्धशाखाध्यक्षः शिवदत्तपट्टनायकवर्यस्य सञ्चालनत्वे जातम्। आदौ प्रयागराजतः युवराजतिवारी वेदपाठेन शुभारम्भमकरोत्। ततःपरं स्वागतभाषणं प्राददत् डॉ. सागरिका भट्टाचार्या यास्ति वर्गप्रशिक्षिका। तदनन्तरं सुललितकण्ठेन स्वागतगीतं परिवेशितवती सुरभारतीसमुपासिका मोनालिसापाणिः। स्वागतगीतात्परं मुख्यातिथेर्भाषणमभवत्। कार्यक्रमे मुख्यातिथिरूपेण उपस्थितासीत् कर्णाटकस्य शिमोगानिवासी, कर्णाटक-उच्चन्यायालयस्य न्यायवादी संस्कृतसमुपासकः, समित्याः राष्ट्रियोपाध्यक्षः, एम बी रमेशजोईस महोदयः। महोदयस्य भाषणात्परं वर्गप्रशिक्षिका पाठदानस्य प्रारम्भमकरोत्, अन्तिमे च शान्तिपाठेन कार्यक्रमस्य सम्पूर्तिमकरोत्।

## अभिनेता पंकजधीरः दिवङ्गतः



हिमसंस्कृतवार्ताः - बी.आर.चोपड़ा इत्यस्य महाभारतनाटके कर्णस्य पात्रस्य कृते प्रसिद्धः वरिष्ठः अभिनेता पंकजधीरः मुम्बई-नगरे अष्टषष्ठितमे वयसि कर्करोगेण युद्धानन्तरं दिवङ्गतः।


# "केन्द्रीयग्रन्थालयद्वारा रिमोटएक्सेसमाध्यमेन डिजिटलग्रन्थालयस्य प्रभावीपूर्णोपयोगाय सम्पन्नं प्रशिक्षणम्"




**हिमसंस्कृतवार्ताः-** डॉ आलोकचन्द्रः । महर्षिमहेशयोगीवैदिकविश्वविद्यालयस्य केन्द्रीयग्रन्थालयद्वारा विद्यार्थि_शोधार्थि_शिक्षकानां कृते "रिमोटएक्सेसमाध्यमेन डिजिटलग्रन्थालयस्य प्रभावीपूर्णोपयोगाय" 13 अक्टूबर 2025 सोमवासरे शिक्षाविभागस्य बहुद्देशीयसभागारे मध्याह्ने 02:00 वादने ई-संसाधनानि, ई-पत्रिकाः, ई-पुस्तकानि च ऑनलाइन माध्यमेन डेटाबेसकार्यक्रमोद्देश्यमाधरीकृत्य माननीयकुलगुरुणा प्रो०प्रमोदकुमारवर्मावर्यसंरक्षणेन एकदिवसीयप्रशिक्षणकार्यक्रमः सुसम्पन्नः।

कार्यक्रमस्य मुख्यविशेषज्ञा सुश्री वंशिकागौतमेन प्रतिभागिभ्यः ई-लाइब्रेरी,रिमोटएक्सेसपोर्टल, विभिन्नडेटाबेसइत्येतेषामुपयोगाय विस्तृततया बोधितम्। कार्यक्रमे अध्यक्षः प्रो.जे.पी.शुक्ला महोदयः, मुख्यातिथिः डॉ. के.के. त्रिपाठीवर्यः, विशिष्टातिथी प्रो. मानवेन्द्रपाण्डेयः, वरिष्ठसिद्धिशिक्षक श्री जी.एस.चौधरीमहोदयौ, तथा श्री कपीश कबीरवर्यः प्रभृतयः आसन्। कार्यक्रमस्य संयोजनं केन्द्रीयग्रन्थालयाध्यक्षेण श्रीअशोकसिंहमहोदयेन कृतम्। श्रीअमितरंजनः, श्रीकिशोरमहलोनिया इत्यनयोः ग्रंथालयसदस्योः महत्सहाय्यम् आसीत्। कार्यक्रमान्ते श्रीअमितरञ्जनवर्येण कार्तज्ञं विनिवेदितम्। कार्यक्रमस्य मंचसंचालनं डॉ. नेहामिश्रा कृतवती।

अस्मिन् अवसरे विश्वविद्यालयस्य अधिकारिणः, विभगाध्यक्षाः, शैक्षणिकशिक्षकाः, अशैक्षिणिककर्मचारिणः, शोधार्थिनः, विद्यार्थिनः विद्यार्थिन्यश्च आहत्य षष्ठीत्याधिकाः जनाः समुपस्थिताः आसन्। , कार्यक्रमोऽयम् प्रत्यक्षतया आभासीयमाध्यमेन च सफलतापूर्वकम् संपन्नमभवत् इति शम्।




असमप्रदेशीयः नारदोपाध्यायः

## काञ्चन साधुवाचः - ०२

१) एको गुणो निहन्ति समस्तदोषान्।
-मनुष्ये यदि एकमात्रमपि सद्गुणो विद्यमानो भवेत्, तर्हि स गुणो हि तस्य समस्तदोषान् अपसारयतीति भावः।
२) एरण्डोऽपि द्रुमायते।
-यत्र वृक्षा एव न सन्ति, तत्र सामान्यवृक्ष एरण्डोऽपि वृक्षस्य महत्त्वम् अधिगच्छति, अर्थात् समादरं लभते इत्याशयः।
३) कुशिष्यमध्यापयतः कुतो यशः।
-कुशिष्यम्, अवाध्यं वा शिष्यम् अध्यापयतः न कोऽपि गुरुः सुख्यातिं लब्धुमर्हति इति भावः।
४) कोकिलानां स्वरो रूपम्।
-कोकिलस्य बहिःरूपं यद्यपि सुन्दरं न दृश्यते, तथापि तस्य कण्ठस्वरः सुमधुरः, मनोमोहकश्च। तात्पर्यं यत् कस्यचन बहिराकृतिः न, अपितु गुणो हि द्रष्टव्यः।
५) गते शोको न कर्तव्यः।
-यत् व्यतीतं, गतं वा तत् पुनर्न कदापि प्रत्यागच्छति। अतो व्यतीतानां सुखदुःखादीनां विषये असकृत् चिन्तनं व्यर्थमेव। वर्तमाने किं कर्तव्यमित्येव चिन्तनं हिताय भवति।
६) गुणधर्मविहीनस्य जीवितं निष्प्रयोजनम्।
-यस्य न कोऽपि सद्गुणः, न वा किमपि हितचिन्तनं, पारमार्थिकभावो वा, तस्य जीवितकाले जगति कस्य वा उपकारः सम्भवेत् ? अतः तादृशस्य जीवनं जगति निष्प्रयोजनं हि स्यादिति कथ्यते। वस्तुतो लोकसेवार्थं हि जीवनस्य आवश्यकता, नान्यथा।
७) चौराणां चन्द्रमा रिपुः।
-दुष्टकार्यं ज्ञानप्रकाशस्य अभावात् सम्भवति। तद्वत् चौर्यकार्यं प्रकाशे, अन्येषु पश्यत्सु च न सम्भवति, तदर्थं अन्धकारमयी रात्रिः आवश्यकी। चन्द्रमाः रात्रौ सर्वत्र स्वप्रकाशं प्रसारयति । तस्मात् चौरस्य कृते चन्द्रमाः शत्रुवत् जातः। यथा सज्जनः दुष्टानां दृष्टौ सदैव शत्रुतुल्यो भवति, तद्वदेव।
८) छिद्रप्रहारिणः शत्रवः।
- केचन न कदापि परगुणान् पश्यन्ति, केवलं परच्छिद्रस्खलनादीनाम् सुसूक्ष्मतया अन्वेषणं हि कुर्वन्ति। कस्यचन गुणानुवादस्तु दूरे हि तिष्ठतु, तस्य कथञ्चित् किञ्चन छिद्रं प्राप्तञ्चेत् तं सद्गुणिनं लक्ष्यीकृत्य अतीव मार्मिकतया वाग्बाणस्य प्रहारं कुर्वन्ति । प्रवृत्तिरियं न केवलं सामान्यानाम् आचरणे हि दृश्यते, अपितु विद्वत्सु अपि व्याधिरयं व्यापकः। वस्तुतः कस्यचन गुणो हि द्रष्टव्यः, न वा छिद्रदोषादिकं द्रष्टव्यं केनापि कदाचिदपि।
९) जपतो नास्ति पातकम्।
- भगवत्स्मरणं, नामजपादिकं मनुष्येण सदैव विधातव्यम्। एवञ्चेत् तादृशो मनुष्यः पापैर्न बाध्यते।
१०) जारस्त्रीणां पतिः शत्रुः।
- या व्यभिचारिणी पत्नी, तस्याः कृते स्वपतिरपि शत्रुतुल्यो भवतीति भावः।

# केन्द्रीयसंस्कृतविश्वविद्यालयस्य ५५ तमस्य स्थापनादिवसस्य साहित्योत्सवस्य च उद्घाटनम्

## *संस्कृतभाषा भारतीयसंस्कृतेः सभ्यतायाः च संवाहिका - झाबरसिंहखर्रा*



**हिमसंस्कृतवार्ताः जयपुर, 15 अक्टूबर।** नवदिल्लीनगरस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य ५५तमः स्थापनादिवसः साहित्योत्सवः च बुधवासरे विश्वविद्यालयस्य जयपुरपरिसरस्य त्रिवेणीनगरे महता उत्साहेन आचरितः। जयपुरपरिसरनिदेशकः, प्रो. रमेशः उक्तवान् यत् कार्यक्रमस्य आरम्भः प्रातः ८:०० वादने श्रीलक्ष्मीनारायणयज्ञेन अभवत्। तदनन्तरं संस्कृतपुस्तकानां प्रदर्शनं मूट-न्यायालयस्य उद्घाटनं च अभवत् । अस्मिन्समये राजस्थानसर्वकारस्य नगरविकास एवं स्वशासन मंत्री झाबरसिंहः खर्रा मुख्यातिथित्वेन उपस्थितः। कार्यक्रमस्य अध्यक्षता कुलपतिः प्रो.श्रीनिवास वरखेड़ी अकरोत्। राजस्थानपत्रिकायाः मुख्यसम्पादकः डॉ. गुलाब कोठारी सारस्वतातिथिः रुपेण, विशिष्टातिथिषु सीकरतः पूर्वसंसदः स्वामी सुमेधानन्दः सरस्वती, शिक्षाशास्त्रस्य डीनः(सीएसयू) प्रो.मदनमोहन झा च विशेषातिथिरूपेण उपस्थिताः आसन्। अस्मिन् अवसरे पत्रिकासमूहस्य प्रधानसम्पादक डॉ. गुलाब कोठारी इत्यस्य विशेषरूपेण सम्मानः, अभिनन्दनः च अभवत् । मुख्यातिथिः झाबरसिंहखर्रा इत्यनेन उक्तं यत् संस्कृतं केवलं भाषा नास्ति, अपितु भारतीयसंस्कृतेः आत्मा, सभ्यतायाः वाहिका च अस्ति। वसुधैव कुतुम्बकं सन्देशं बोधयति । सः अवदत् यत् विश्वविद्यालयः परम्परायाः आधुनिकतायाः च एकीकरणस्य उत्तमं उदाहरणम् अस्ति, यत्र वैदिकविज्ञानस्य, दर्शनस्य, अङ्गीयस्य, नीति-नवीनीकरणस्य च सुन्दरं संगमं दृश्यते। जयपुरपरिसरस्य कृते आवश्यकभूमिविनियोगाय राज्यसर्वकारः सर्वं सम्भवं समर्थनं करिष्यति इति आश्वासनं दत्तवान्। अध्यक्षीयभाषणे विश्वविद्यालयस्य कुलपतिः प्रो.श्रीनिवासवर्खेडी इत्यनेन उक्तं यत् विश्वविद्यालयः शास्त्रछात्रसंरक्षणयोः च प्रतिबद्धः अस्ति। सः सूचितवान् यत् विश्वविद्यालये भारतीयन्यायशास्त्रम्, आईटीईपी योगविज्ञानम्, आयुर्वेदगुरुकुलम् इत्यादयः नूतनाः कार्यक्रमाः प्रारब्धाः सन्ति। तदतिरिक्तं छात्रवृत्तिषु ५०% वृद्धिः कृता अस्ति । कुलपतिः जयपुरपरिसरस्य वैदिक-वेदाङ्ग-विज्ञान-परम्पराणां विषये अनुसन्धानस्य प्रवर्धनस्य आवश्यकतायाः उपरि बलं दत्त्वा ए.आइ.-आधारितस्य संस्कृत-आह्वानस्य घोषणां कृतवान् । अस्मिन् अवसरे विश्वविद्यालयस्य विविधाः शैक्षणिकपरियोजनानां उद्घाटनं कृतम् । प्रधानमन्त्री नरेन्द्र मोदी तथा शिक्षामन्त्री धर्मेन्द्रप्रधानं प्रति आभारं प्रकटयन् विश्वविद्यालयस्य सर्वेषां कर्मचारिणां कल्याणाय स्वास्थ्ययोजनायाः शुभारंभः कृतम्। अधुना विश्वविद्यालयस्य कर्मचारिणः योजनायाः अन्तर्गतं चिकित्सासुविधानां लाभं प्राप्तुं शक्नुवन्ति। कुलपति वर्खेडी इत्यनेन उक्तं यत् विश्वविद्यालये आदर्शमहाविद्यालये च सर्वाणि रिक्तपदानि आगामिषड्मासेषु पूरयिष्यन्ति। त्रयेषु परिसरेषु रिक्तस्थानानां नियुक्तिप्रक्रिया शीघ्रमेव आरभ्यते इति अपि सः घोषितवान्

# अद्यतनः वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने 'अध्येता' इत्यस्य वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य मुख्यवार्ताः काः सन्ति?
**नन्दिनी-** प्रथमा वार्ता राष्ट्रसुरक्षायाः विषये अस्ति। पश्चिम-सेनादलस्य उपप्रमुखः मनोज-कटियारः 'सिन्दूर-अभियानम् द्वितीयं' पूर्वस्मात् अधिकं घातकं भविष्यति इति उक्तवान् अस्ति।
**काव्या-** अहो, सेनायाः दृढनिश्चयः श्रुतः। इदानीं विहारराज्यात् एका वार्ता आगता। प्रशान्त-किशोरः यदि निर्वाचने विजयं प्राप्नोति तर्हि मद्यपान-प्रतिबन्धं दूरीकरिष्यति इति प्रतिज्ञातवान् अस्ति।
**नन्दिनी-** समाजस्य स्वास्थ्यं प्रतिबन्धस्य च विषये अयं महान् विचारः। आर्थिक-क्षेत्रात् एका वार्ता आगता। अन्ताराष्ट्रिय-मुद्राकोषः अमेरिकादेशस्य शुल्क-चिन्तासु सत्स्वपि, आगामिवर्षे भारतस्य सकल-राष्ट्रियोत्पादस्य वृद्धिः षड्दशमिकषट्प्रतिशत-मिता भविष्यति इति सूचितवान् अस्ति।
**काव्या-** आर्थिकवृद्धिः सर्वदा आनन्दस्य विषयः। परन्तु एका दुःखदा वार्ता अपि अस्ति। हरियाणा-राज्यस्य एकस्य उच्चारक्षकाधिकारिणः मृत्योः अन्वेषणं कुर्वन् अन्यः अधिकारी आत्महत्यां कृतवान् अस्ति। अनेन प्रकरणे नूतनं वलनम् आगतम्।
**नन्दिनी-** सत्यमेव, अतीव दुःखदम् इदम्। अन्वेषणे सत्यं शीघ्रं प्रकटितं भवतु इति आशास्यते। अद्य एतावदेव। श्वः पुनर्मिलिष्यामः। धन्यवादः।

हिमसंस्कृतवार्ताः,ईदर-धीरजः

## "वन्दे संस्कृतमातरम्"
## "लौकिकन्यायकोशः"
### "कृतप्रणाशाकृताभ्यागम-प्रसङ्गन्यायः"




कृतप्रणाशो नाम कृतस्य नाशः। अकृताभ्यागमो नाम अकृतानाम् अगत्या स्वीकारः। (क्वचित् सिद्धान्तप्रतिपादनसमये अपसिद्धान्तस्य कारणेन स्वसिद्धान्तहानिः अस्वीकार्यस्य कस्यचित् स्वीकारः आपतति इति अनेन न्यायेन बोध्यते)

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्